# সর্বেষ্টপ্রদং গজাননস্তোত্রম্

{॥ সর্বেষ্টপ্রদং গজাননস্তোত্রম্ ॥}

শ্রীগণেশায় নমঃ ।

কপিল উবাচ ।

নমস্তে বিঘ্নরাজায ভক্তানাং বিঘ্নহারিণে ।

অভক্তানাং বিশেষেণ বিঘ্নকর্ত্রে নমো নমঃ ॥ ১॥

আকাশায চ ভূতানাং মনসে চামরেষু তে ।

বুদ্ধ্যৈরিন্দ্রিযবর্গেষু ত্রিবিধায নমো নমঃ ॥ ২॥

দেহানাং বিন্দুরূপায মোহরূপায দেহিনাম্ ।

তযোরভেদভাবেষু বোধায তে নমো নমঃ ॥ ৩॥

সাঙ্খ্যায বৈ বিদেহানাং সংযোগানাং নিজাত্মনে ।

চতুর্ণাং পঞ্চ মাযৈব সর্বত্র তে নমো নমঃ ॥ ৪॥

নামরূপাত্মকানাং বৈ শক্তিরূপায তে নমঃ ।

আত্মনাং রবযে তুভ্যং হেরম্বায নমো নমঃ ॥ ৫॥

আনন্দানাং মহাবিষ্ণুরূপায নেতি ধারিণাম্ ।

শঙ্করায চ সর্বেষাং সংযোগে গণপায তে ॥ ৬॥

কর্মণাং কর্মযোগায জ্ঞানযোগায জানতাম্।

সমেষু সমরূপায লম্বোদর নমোঽস্তু তে ॥ ৭॥

স্বাধীনানাং গণাধ্যক্ষ সহজায নমো নমঃ ।

তেষামভেদভাবেষু স্বানন্দায চ তে নমঃ ॥ ৮॥

নির্মাযিকস্বরূপাণামযোগায নমো নমঃ ।

যোগানাং যোগরূপায গণেশায নমো নমঃ ॥ ৯॥

শান্তিযোগপ্রদাত্রে তে শান্তিযোগমযায চ ।

কিং স্তৌমি তত্র দেবেশ অতস্ত্বাং প্রণমাম্যহম্ ॥ ১০॥

ততস্তং গণনাথো বৈ জগাদ ভক্তমুত্তমম্ ।

হর্ষেণ মহতা যুক্তো হর্ষযন্মুনিসত্তম ॥ ১১॥

শ্রীগণেশ উবাচ ।

ত্বযা কৃতং মদীযং যৎস্তোত্রং যোগপ্রদং ভবেত্ ।

ধর্মার্থকামমোক্ষাণাং দাযকং প্রভবিষ্যতি ॥ ১২॥

বরং বরয মত্তস্ত্বং দাস্যামি ভক্তিযন্ত্রিতঃ ।

ত্বৎসমো ন ভবেত্তাত তত্ত্বজ্ঞানপ্রকাশকঃ ॥ ১৩॥

তস্য তদ্বচনং শ্রুত্বা কপিলস্তমুবাচ হ ।

ত্বদীযামচলাং ভক্তিং দেহি বিঘ্নেশ মে পরাম্ ॥ ১৪॥

ত্বদীযভূষণং দৈত্যো হৃত্বা সদ্যো জগাম হ ।

ততশ্চিন্তামণিং নাথ তং জিত্বা মণিমানয ॥ ১৫॥

যদাহং ত্বাং স্মরিষ্যামি তদাত্মানং প্রদর্শয ।

এতদেব বরং পূর্ণং দেহি নাথ নমোঽস্তু তে ॥ ১৬॥

গৃৎসমদ উবাচ ।

তস্য তদ্বচনং শ্রুত্বা হর্ষযুক্তো গজাননঃ ।

উবাচ তং মহাভক্তং প্রেমযুক্তং বিশেষতঃ ॥ ১৭॥

ত্বযা যৎপ্রার্থিতং বিষ্ণো তৎসর্বং প্রভবিষ্যতি ।

তব পুত্রো ভবিষ্যামি গণাসুরবধায চ ॥ ১৮॥

ইতি শ্রীমুদ্গলপুরাণে গজাননস্তোত্রং সমাপ্তম্ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)

Amith K Nagaraj (amithkn@rediffmail.com)

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Sarva Ista Prada Gajanana Stotram Lyrics in Bengali PDF
% File name : sarveShTapradaMgajAnanastotram.itx
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : mudgalapurANe
% Latest update : September 16, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website